# Lesson 51. यण्सन्धिः ।

We have been dealing with the अ/आ so far. The rest of the swaras can't wait to be discussed as well.
These are the rules to follow:

| | First word ending in | | Next word beginning with | | Results in |
|---|---|---|---|---|---|
| 1. | इ/ ई | followed by | any other swara but for इ/ ई | = | इ/ ई changing to य् |
| 2. | उ/ ऊ | followed by | any other swara but for उ/ ऊ | = | उ/ ऊ changing to व् |
| 3. | ऋ/ ॠ | followed by | any other swara but for ऋ/ ॠ | = | ऋ/ ॠ changing to र् |
| 4. | ऌ / ॡ | followed by | any other swara but for ऌ / ॡ | = | ऌ / ॡ changing to ल् |

Then the changed swara of the first word gets added to the swara of the next word <u>AGAIN</u> to form a new letter.

Here are examples for each of them:

1. प्रति + एकम्
   प्रत् + य् + एकम् = प्रत्येकम् ।
2. मनु + अन्तरम्
   मन् + व् + अन्तरम् = मन्वन्तरम् ।
3. पितृ + इच्छा
   पित् + र् + इच्छा = पित्रिच्छा
4. घस्ऌ + आदेशः
   घस् + ल् + आदेशः = घस्लादेशः ।

The exercises with the यण्सन्धिः are in Lesson 51 A.

# Lesson 51 A. Exercises with the यण्सन्धिः ।

सन्धिः

1. प्रति + आह =
2. अनु + अयः =
3. इति + आदि =
4. मातृ + आरतिः =
5. पितृ + आज्ञा =
6. मधु + अरिः =
7. तु + अर्थो=
8. अहनि + अहनि =
9. सु + आगतम् =
10. काष्ठानि + आनेतुम् =
11. अपि + अस्ति =
12. लृ + आकृतिः =

सन्धिविच्छेदः ।

1. यद्यपि
2. पित्रंशः
3. साध्विदम्
4. स्मराम्यहम्
5. वस्त्राण्युत्पादयति
6. इत्यपि
7. धात्रंशः
8. मध्वरिः
9. अत्युत्तमः
10. पार्वत्यधुना
11. इत्याक्षिप्तः
12. भवत्वधुना

Lesson 51 B. Answers to Lesson 51 A.

सन्धिः

1. प्रति + आह = प्रत्याह ।
2. अनु + अयः = अन्वयः ।
3. इति + आदि = इत्यादि ।
4. मातृ + आरतिः = मात्रारतिः ।
5. पितृ + आज्ञा = पित्राज्ञा ।
6. मधु + अरिः = मध्वरिः ।
7. तु + अर्थो= त्वर्थो ।
8. अहनि + अहनि = अहन्यहनि
9. सु + आगतम् = स्वागतम् ।
10. काष्ठानि + आनेतुम् =काष्ठान्यानेतुम् ।
11. अपि + अस्ति = अप्यस्ति ।
12. लृ + आकृतिः = लाकृतिः ।

सन्धिविच्छेदः ।

1. यद्यपि = यदि +अपि
2. पित्रंशः = पितृ +अंशः
3. साध्विदम् = साधु + इदम्
4. स्मराम्यहम् = स्मरामि + अहम्
5. वस्त्राण्युत्पादयति = वस्त्राणि + उत्पादयति
6. इत्यपि = इति +अपि
7. धात्रंशः = धातृ +अंशः
8. मध्वरिः = मधु + अरिः
9. अत्युत्तमः = अति + उत्तमः
10. पार्वत्यधुना = पार्वती + अधुना
11. इत्याक्षिप्तः = इति + आक्षिप्तः
12. भवत्वधुना = भवतु + अधुना

Lesson 51 C. A Laugh or two!

And i thought Sanskrit was a serious language.

School stories.

1. अध्यापकः सर्वान् छात्रान् उद्दिश्य उक्तवान् .... क्रीडास्पर्धाविषये सर्वेऽपि एकं निबन्धं लिखन्तु इति । सर्वे छात्राः लिखितवन्तः । किन्तु एकः छात्रः किमपि न लिखितवान् । अध्यापकः तं पृष्टवान् किं भोः भवान् निबन्धः किं न लिखति ? तदा छात्रः शान्तस्वरेण उक्तवान् .. श्रीमन् ! क्रीडास्पर्धा तु वृष्टिकारणतः स्थगिता ( stopped ) अस्ति।

2. अद्य पाठः अस्ति इत्यस्य भविष्यकालरूपं किम् ?
श्वः विरामः भविष्यति इति ।
कथम् एतत् ?
यतः श्वः रविवासरः ।

3. शिष्येण गृहपाठेन कृतान् दोषान् दृष्ट्वा अध्यापकः उक्तवान् ... एतावन्तः दोषाः ! ते अपि एकेनैव कृताः !!! इति ।
तदा शिष्यः उक्तवान् .... एते सर्वे दोषाः एकेनैव कृताः न श्रीमान् ! गृहपाठलेखने मम पिता अपि साहाय्यं कृतवान् आसीत् इति ।

************

Lesson 52. Yaantavaantaadesha-sandhi.

यान्तवान्तादेशसन्धिः ।

| | First word ending in | | Next word beginning with | | Results in |
|---|---|---|---|---|---|
| 1. | ए | followed by | any swara | = | ए changing to अय् |
| 2. | ऐ | followed by | any swara | = | ऐ changing to आय् |
| 3. | ओ | followed by | any swara | = | ओ changing to अव् |
| 4. | औ | followed by | any swara | = | औ changing to आव् |

Then the changed swara of the first word gets added to the swara of the next word <u>AGAIN</u> to form a new letter.

Here are examples for each of them:

1. हरे + एतत्
   हर् + अय् + एतत् = हरयेतत्
2. नै + अकः
   न् + आय् + अकः = नायकः
3. विष्णो + एतत्
   विष्ण् + अव् + एतत् = विष्णवेतत्
4. पौ + अकः
   प् + आव् + अकः = पावकः

Lesson 52 A. Exercises with the यान्तवान्तादेशसन्धिः ।

Do the sandhi for the following:

1. हरे ए
2. तस्मै इदम्
3. गुरो आदिश
4. बालकौ आगतौ
5. वै इह
6. कटे उपवेशनम्
7. फले इच्छा
8. द्विषावहै आर्तिम्
9. करौ एतौ
10. भानो इह
11. नरौ उदारौ
12. तौ एकदा

सन्धिविच्छेदः

1. गुरवुत्साहः
2. बालावोजस्विनौ
3. जनयुत्कण्ठा
4. फलयिच्छा
5. छात्राववगतवन्तौ

Lesson 52 B. Answers to lesson 52 A.

1. हरे + ए = हरये
2. तस्मै + इदम् = तस्मायिदम्
3. गुरो + आदिश = गुरावादिश
4. बालकौ + आगतौ = बालकावागतौ
5. वै + इह = वायिह
6. कटे + उपवेशनम् = कटयुपवेशनम्
7. फले + इच्छा = फलयिच्छा
8. द्विषावहै + आर्तिम् = द्विषावहायार्तिम्
9. करौ + एतौ = करावेतौ
10. भानो + इह = भानविह
11. नरौ + उदारौ = नारावुदारौ
12. तौ + एकदा = तावेकदा

सन्धिविच्छेदः

1. गुरवुत्साहः = गुरो + उत्साहः
2. बालावोजस्विनौ = बालौ + ओजस्विनौ
3. जनयुत्कण्ठा = जने + उत्कण्ठा
4. फलयिच्छा = फले + इच्छा
5. छात्राववगतवन्तौ = छात्रौ + अवगतवन्तौ

Lesson 52 C. Rakshabandhanam.

| Nouns/Pronouns | Verbs | Avyayas | Adjectives/Participles |
|---|---|---|---|
| श्रावणमास month of July- August. M | प्र + सीद् 1 P.P. be happy | ननु indeed | प्रचलित customary. |
| पौर्णिमा full moon F | बन्ध् 9 P.P. to tie, to bind | खलु indeed | |
| उत्सव festival M | उद् + धृ 1 P.P. to lift, to uplift | | |
| नारिकेलफल coconut N | | | |
| सागर , रत्नाकर ocean M | | | |
| सबल strong , mighty M/ N /F | | | |

रक्षाबन्धनम् ।

श्रावणमासस्य पौर्णिमायां विविधाः उत्सवाः भवन्ति । ये जनाः सागरस्य समीपे वसन्ति ते सागरं नारिकेलफलैः पूजयन्ति प्रार्थयन्ते च । हे रत्नाकर प्रसीद । यच्छ अस्मभ्यं मौक्तकानि, सुखं समृद्धिं च । तव मार्गेण अस्माकं प्रवासः सुखकरः भवतु इति । एतस्मिन् एव दिवसे संस्कृतदिनोत्सवः भवति । एतस्य दिनस्य एव रक्षाबन्धनमहोत्सवः भवति ।

ननु एतत् रक्षाबन्धनं पुरा राजकुलेषु एव प्रचलितम् आसीत् । एतस्य महत्त्वं पौराणिककथासु ऐतिहासिककथासु च प्रसिद्धम् ।

एतस्मिन् दिवसे भगिनी बन्धोः करे रक्षाकङ्कणं बध्नाति । तम् एवं वदति...माम् इव सर्वाः भगिनीः रक्ष सर्वसङ्कटेभ्यः । स्वसमाजस्य राष्ट्रस्य च अभ्युदयाय सिद्धः भव । सर्वान् समाजबान्धवान् उद्धर । एतेन रक्षाकङ्कणबन्धनेन प्रतिवर्षं स्मराव आवयोः कर्तव्यम् इति । एवंविधं स्नेहसूत्रमयं बन्धनं दृढं भवति । सबलाः दुर्बलान् रक्षन्तु , सर्वेषां मङ्गलं भवतु इतीच्छन्ति खलु भारतीयाः एतेन रक्षाबन्धनेन । एषः एव खलु एतस्य उत्सवस्य विशेषः ।

Lesson 53. A Glimpse of Vyanjan Sandhi.

When consonants join the joining bandwagon, we get, what you call, Vyanjan Sandhi.....व्यञ्जन सन्धिः | One of the most frequently used sandhi is the जश्त्वसन्धि | We can do the rest of the व्यञ्जन सन्धिः at a later date.

जश्त्वसन्धि ( १ ) Go by these rules:
If a word ends with the first व्यञ्जन of the five वर्ग s ( that is : either क्, च्, ट्, त् or प् ) and is the followed by a word beginning with any swara then that व्यञ्जन of the first word gets transformed into the third व्यञ्जन of the same वर्ग.
That is :
क् + any swara becomes ग्
च् + any swara becomes ज्
ट + any swara becomes ड्
त् + any swara becomes द्
प् + any swara becomes ब्

Then it gets added to the swara of the next word again to form a new letter.

Try the exercises in 53 A.

Lesson 53 A. Further exercises with Sandhi.

1. Do the sandhi of the following:

1. वाक् + ईशः =
2. दिक् + अम्बरः =
3. अच् + अन्तः =
4. सत् + आचारः =
5. जगत् + ईशः =
6. तत् + आनय =
7. मत् + अङ्के =
8. सुप् + अन्तः =

2. Write the present and the past tense प्रथमपुरुष एकवचन forms of these धातु s + the upasargas.

A good idea would be to go through the upasarga lesson again before you attempt to do this exercise.

This exercise will help you figure out how the sandhi rules are applied with the past tense of a dhatu with an upasarga .

Do remember, the अ is added to the root dhatu. That means that you will be adding upasarga + अ + dhatu for the past tense. One has been done for you.

( Try and repeat the entire क्रियापद table to yourself just to hear what the words sound like....that will help you identify the words whenever you next hear them.)

The list is long, but for those of you who would like to improve your vocabulary, it is a treasure trove!

1. प्रति + वद् ( to reply) प्रतिवदति , प्रत्यवदत् ( प्रति +अ +वद् )
2. अनु + चर् ( to imitate)
3. अनु + तप् ( to repent)

4. वि + हर्( to wander)
5. सम् + हर् ( to kill)
6. अनु + नय्( to cajole)
7. उप + नय्( to wear the sacred thread)
8. आ + नय्( to bring)
9. निर् + नय् (use it as णय् decide)
10. अभि + नय्( to act)
11. परि + नय् ( use it as णय् to wed.)
12. परि + पत्(to wander)
13. प्र +नि + पत्(to salute)
14. अनु + भू ( भवति) to experience.
15. उद् + भू to rise
16. परा +भू to defeat
17. परि + भ्रम् to make a journey.
18. सम् + भ्रम् to be in a fix.
19. अधि+ वस् to live.
20. वि + वह् to marry
21. सम + वह् to massage.
22. प्र + सद् ( सीदति = sit ) to be pleased.
23. सम् + स्मृ ( स्मरति) to recall carefully.
24. वि + स्मृ to forget.
25. अनु + कृ ( करोति) to imitate.
26. अधि + कृ to take possession.
27. अप + कृ to act against someone.
28. उप + कृ to help
29. प्रति+ कृ to decorate.
30. निर् +आ + कृ to remove.
31. अव + गम्( to understand)
32. उद् + गम् to rise.
33. आ + गम् to come

34. उप + गम् to approach
35. अनु + गम् to follow
36. सम + आ + गम् to come together.
37. निर् + गम् to go away.
38. प्रति + गम् to go towards.
39. प्रति + आ + गम् to return.

Lesson 53 B Answers to Lesson 53 A.

1. Do the sandhi of the following:

1. वाक् + ईशः = वागीशः ।
2. दिक् + अम्बरः = दिगम्बरः ।
3. अच् + अन्तः = अजन्तः ।
4. सत् + आचारः = सदाचारः ।
5. जगत् + ईशः = जगदीशः ।
6. तत् + आनय = तदानय ।
7. मत् + अङ्के = मदङ्के ।
8. सुप् + अन्तः = सुबन्तः ।

2. The present and the past tense प्रथमपुरुष एकवचन forms of these धातु s + the upasargas.

1. प्रति + वद् ( to reply) प्रतिवदति , प्रत्यवदत् ( प्रति +अ +वद् )
2. अनु + चर् ( to imitate) अनुचरति , अन्वचरत् ।
3. अनु + तप् ( to repent) अनुतपति , अन्वतपत् ।
4. वि + हर् ( to wander) विहरति , व्यहरत् ।
5. सम् + हर् ( to kill) संहरति , समहरत् ।
6. अनु + नय् ( to cajole) अनुनयति , अन्वनयत् ।
7. उप + नय् ( to wear the sacred thread) उपनयति , उपानयत् ।
8. आ + नय् ( to bring) आनयति , आनयत् ।
9. निर् + नय् (use it as णय् decide) निर्णयति , निरणयत् ।
10. अभि + नय् ( to act) अभिनयति , अभ्यनयत् ।
11. परि + नय् ( use it as णय् to wed.) परिणयति , पर्यनयत् ।
12. परि + पत् (to wander) परिपतति , पर्यपतत् ।
13. प्र +नि + पत् (to salute) प्रणिपतति , प्रण्यपतत् ।

14. अनु + भू ( भवति) to experience. अनुभवति , अन्वभवत् ।
15. उद् + भू to rise उद्भवति , उदभवत् ।
16. परा +भू to defeat पराभवति , पराभवत् ।
17. परि + भ्रम् to make a journey. परिभ्रमति , पर्यभ्रमत् ।
18. सम् + भ्रम् to be in a fix. सम्भ्रमति , समभ्रमत् ।
19. अधि+ वस् to live. अधिवसति , अध्यवसत् ।
20. वि + वह् to marry विवहति , व्यवहत् ।
21. सम् + वह् to massage. संवहति ,समवहत् ।
22. प्र + सद् ( सीदति = sit ) to be pleased. प्रसीदति , प्रासीदत् ।
23. सम् + स्मृ ( स्मरति) to recall carefully. संस्मरति , समस्मरत् ।
24. वि + स्मृ to forget. विस्मरति , व्यस्मरत् ।
25. अनु + कृ ( करोति) to imitate. अनुकरोति , अन्वकरोत् ।
26. अधि + कृ to take possession. अधिकरोति , अध्यकरोत् ।
27. अप + कृ to act against someone. अपकरोति , अपाकरोत् ।
28. उप + कृ to help उपकरोति , उपाकरोत् ।
29. प्रति+ कृ to decorate. प्रतिकरोति , प्रत्यकरोत् ।
30. निर् +आ + कृ to remove. निराकरोति , निराकरोत् ।
31. अव + गम् ( to understand) अवगच्छति , अवागच्छत् ।
32. उद् + गम् to rise. उद्गच्छति , उदगच्छत् ।
33. आ + गम् to come आगच्छति , आगच्छत् ।
34. उप + गम् to approach उपगच्छति , उपागच्छत् ।
35. अनु + गम् to follow अनुगच्छति , अन्वगच्छत् ।
36. सम + आ + गम् to come together. समागच्छति समागच्छत् ।
37. निर् + गम् to go away. निर्गच्छति निरगच्छत् ।
38. प्रति + गम् to go towards. प्रतिगच्छति , प्रत्यगच्छत् ।
39.प्रति + आ + गम् to return. प्रत्यागच्छति, प्रत्यागच्छत् ।

Lesson 53 C. Donkey turned tiger.

| Nouns/Pronouns | Verbs | Avyayas | Adjectives/Participles |
|---|---|---|---|
| रजक washerman M | | मत्वा having understood/ known | सञ्जात became |
| रासभ donkey M | | यथेष्टं as desired | समीचीन excellent |
| घास grass N | | | पुष्टाङ्ग nourished body |
| अभाव non-availability M | | | पीवरतनु stout |
| उपाय idea M | | | प्रतिच्छन्न covered |
| चर्म skin N | | | |
| क्षेत्रपालक guard M | | | |
| रात्रिशेष end of the night M | | | |

कस्मिंश्चित् ग्रामे एकः रजकः अवर्तत । तस्य एकः रासभः आसीत् । घासस्य अभावस्य कारणात् सः रासभः अतीव दुर्बलः सञ्जातः ।

कदाचित् तेन रजकेन कुत्रापि व्याघ्रचर्मं लब्धम् । सः अचिन्तयत्.. अहो समीचीनः उपायः । यदि एतत् चर्मं धारयित्वा मम रासभः रात्रौ यवक्षेत्रं गच्छति , तर्हि क्षेत्रपालकाः तं व्याघ्रं मत्वा क्षेत्रात् न निष्कासयन्ति इति ।

रासभः प्रतिरात्रिं यथेष्टं यवान् खादति स्म । रजकः अपि रात्रिशेषे गूढं तं गृहम् आनयति स्म । एवं प्रतिरात्रिं कृत्वा रासभः पुष्टाङ्गः पीवरतनुः जातः ।

एकदा रात्रौ क्षेत्रे यदा सः यवनं अभक्षयत् तदा दूरात् एव रासभीशब्दं श्रुत्वा स्वयम् अपि तारस्वरेण शब्दायितुम् आरब्धवान् ।

तत् श्रुत्वा क्षेत्रपालकाः ...रासभः एषः व्याघ्रस्य चर्मणा प्रतिच्छन्नः इति जानन्तः दण्डैः तं मारितवन्तः ।

अतः उच्यते ......... मौनं सर्वार्थसाधनम् ।

# Summing Up Month 12.

Who said Month 11 had the shortest Summing Up? Month 12 does.

1. Some more Sandhis. Easy too. The difficult ones for much later.